श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीलक्ष्मीहयवदन प्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीलक्ष्मीहयवदन प्रपत्तिः ॥

विशुद्धविज्ञानघनस्वरूपं
विज्ञान विश्राणन बद्धदीक्षम्।
दयानिधिं देहभृतां शरण्यं
देवं हयग्रीवमहं प्रपद्ये॥ १ ॥

ब्रह्माणमादौ व्यदधादमुष्मै
वेदांश्च यः स्म प्रहिणोति नित्यान्।
स्वगोचरज्ञान विधायिनं तं
देवं हयग्रीवमहं प्रपद्ये॥ २ ॥

उद्गीथतारस्वरपूर्वमन्तः
प्रविश्य पातालतलादहार्षीत्।
आम्नायमाकण्ठहयो य एतं
देवं हयग्रीवमहं प्रपद्ये॥ ३ ॥

प्रदाय पुत्राय पुनः श्रुतीर्यो
जघान दैत्यौ नियताब्धिवासम्।
हव्यैश्च कव्यैश्च तमर्च्यमानं
देवं हयग्रीवमहं प्रपद्ये॥ ४ ॥

यन्नाभिनालीकदलस्थनीर
बिन्दूत्थितौ तौ मधुकैटभाख्यौ।
वेदापहाराय तमो रजस्तं
देवं हयग्रीवमहं प्रपद्ये॥ ५ ॥

काम्यार्च्यतां प्राप्य वरं सुरेषु
गतेषु यज्ञाग्रहरोऽर्थितो यः।
अदर्शयत् काय हयं वपुस्तं
देवं हयग्रीवमहं प्रपद्ये॥ ६ ॥

यो जायमानं पुरुषं प्रपश्यन्
मोक्षार्थचिन्तापरमातनोति।
विद्याधिदेवं मधुसूदनं तं
देवं हयग्रीवमहं प्रपद्ये॥ ७ ॥

आदित्यबिम्बेऽश्ववपुर्दधत् सन्
अयातयामान् निगमान् अदिक्षत्।
यो याज्ञवल्क्याय दयानिधिं तं
देवं हयग्रीवमहं प्रपद्ये॥ ८ ॥

विज्ञानदानप्रथिता जगत्यां
व्यासादयो वागपि दक्षिणा सा।
यद्वीक्षणांशाऽऽहितवैभवास्तं
देवं हयग्रीवमहं प्रपद्ये॥ ९ ॥

मत्स्यादिरूपाणि यथा तथैव
नानाविधाचार्यवपूंषि गृह्णन्।
वेदान्तविद्याः प्रचिनोति यस्तं
देवं हयग्रीवमहं प्रपद्ये॥ १० ॥

श्रेष्ठः कृतज्ञः सुलभोऽन्वितानां
शान्तः सुबुद्धिः प्रथितो हि वाजी।
तदाननाविष्कृतसद्गुणौघं
देवं हयग्रीवमहं प्रपद्ये॥ ११ ॥

हस्तैर्दधानं दरचक्रकोश-
व्याख्यानमुद्राः सितपद्मपीठम्।
विद्याख्यलक्ष्म्यञ्चितवामभागं
देवं हयग्रीवमहं प्रपद्ये॥ १२ ॥

॥ इति श्रीलक्ष्मीहयवदन प्रपत्तिः समाप्ता ॥